SUṢAMĀ : Multidisciplinary Research Journal ISSN: 3107-4529
(International Peer-Reviewed & Refereed Journal)
Vol. 1, Issue-3, (Jul-Sep) 2025

# सांख्ययोगन्यायवैशेषिकदर्शनदिशा सुखस्य तुलनात्मकम् अध्ययनम्

## Sāṃkhyayoganyāyavaiśeṣikadarśanadiśā sukhasya tulanātmakam adhyayanam

**Purna Chandra Mondal**
Research Scholar
Visva Bharati University
Santiniketan, West Bengal, India
Email: purnachandra553@gmai.com

**Abstract:** भारतीयषड्विधास्तिकदर्शनेषु सांख्यदर्शनं योगदर्शनञ्च अतिप्राचीने अन्यतमे च दर्शने। सांख्ययोगदर्शनयोः मौलिकतत्त्वे पुरुषः प्रकृतिश्च। सांख्ययोगदर्शनानुसारं सत्त्वरजस्तमसां साम्यावस्था प्रकृतिः। त्रिविधगुणेषु सत्त्वगुणः प्रीत्यात्मकः अर्थात् सुखस्वरूपं, रजोगुणः अप्रीत्यात्मकः अर्थात् दुःखस्वरूपं, तमोगुणः विषादात्मकः अर्थात् मोहस्वरूपम्। अत एव सुखं जडप्रकृतेः वैशिष्ट्यम्। यस्मात् त्रिगुणात्मकप्रकृतिः सुखदुःखमोहात्मिका। अपरपार्श्वे न्यायवैशेषिकदर्शनप्रकरणग्रन्थेषु रूपरसादिचतुर्विंशतिगुणेषु अन्यतमगुणः सुखम्। आचार्यः अन्नंभट्टः तस्य तर्कसंग्रहग्रन्थे सुखस्वरूपम् उक्तवान् यत् सर्वेषामनुकूलतया वेदनीयं सुखम् इति। अर्थात् सकलप्राणीनां यत् स्वाभाविकाभिलाषस्य विषयरूपेण ज्ञायते तत् सुखम्। सुखमिदं आत्मनः विशेषगुणः— बुद्ध्यादयोऽष्टावात्ममात्रविशेषगुणाः। एवञ्च तर्कभाषानामकग्रन्थे सुखप्रसङ्गे उक्तं— प्रीतिः सुखम्। तच्च सर्वात्मनामनुकूलवेदनीयम्।

उपर्युक्तालोचनातः वक्तुं शक्यते सांख्ययोगानुसारेण सुखं त्रिगुणात्मकप्रकृत्या सह सम्बन्धयुक्तम्। सुखादयः जडप्रकृतेः विषयाः यत् सृष्टेः अनन्तरं प्रकृतिः पुरुषाय भोगरूपेण प्रददाति किञ्च पुरुषः सुखादिविषयाणां भोक्ता भवति। प्रकृतपक्षे सुखादिविषयाः पुरुषस्य न भवन्ति, प्रकृतिपुरुषसंयोगवशात् पुरुषे आरोप्यते। किन्तु अपरपार्श्वे न्यायवैशेषिकदर्शने सुखं जीवात्मनः विशेषगुणः यत् गुणगुणीरूपसमवायसम्बन्धेन जीवात्मनि तिष्ठति। अत एव सांख्ययोगन्यायवैशेषिकदर्शनदृष्ट्या सुखविषयकः या अवधारणा तस्य तुलनात्मकं विश्लेषणं मम निबन्धस्य प्रतिपाद्यविषयः।

**Keywords:** सुखं, गुणः, प्रकृतिः, आत्मा, सांख्यम्।

**भूमिका:** भारतीयदर्शनम् आध्यात्मिकतावादस्य दर्शनम्। केवलं चार्वाकदर्शनं व्यतिरिच्य सर्वाणि दर्शनानि आध्यात्मिकानि। भारतीयदर्शने दर्शनशब्देन तत्त्वदर्शनं तत्त्वदर्शनस्य उपायाश्च बोध्यन्ते। भारतीयदर्शने सर्वदा सत्योपलब्धेः तत्त्वोपलब्धेः उपरि वा गुरुत्त्वम् आरोप्यते। मानवजीवनस्य परमपुरुषार्थः भवति मोक्षः मुक्तिः वा। किञ्च अयं मोक्षः

भारतीयाध्यात्मिकदर्शनसम्प्रदायानां मूलालोचनाया: विषय:। भारतीयदर्शनसम्प्रदायानां चरमलक्ष्यं परमपुरुषार्थ: मोक्ष:, किन्तु तस्मिन् विषये समन्वयलक्षितत्वेऽपि प्रमाणगतप्रमेयगतकार्यकारणवादप्रभृतिविषये भारतीयदर्शनसम्प्रदायेषु मतवैषम्यं वर्तते। प्रत्येकदर्शनसम्प्रदायशास्त्रेषु तस्य तस्य दर्शनानुसारं इदं रहस्यमयं जगत्, जगत: सर्वेषां तत्त्वानां यथार्थस्वरूपं, तेषां यथार्थज्ञानलाभोपाय: इत्यादिविषया: यथायथं प्रतिपादिता:। एवं सांख्ययोगे न्यायवैशेषिकदर्शने चापि प्रत्येकजीवानां आकांक्षितसुखस्वरूपम् उपस्थापितम्। अन्यान्यदर्शनसम्प्रदायरीत्या सांख्ययोगस्य न्यायवैशेषिकदर्शनस्य च मुख्यलक्ष्यं जागतिकदु:खात् निवृत्तिलाभ:। तस्मात् जागतिकदु:खस्य अभाव: सुखम्। सुखप्रसङ्गे सांख्ययोगे न्यायवैशेषिकदर्शने च अधिकतया सादृश्यं दृश्यते चेदपि सुखस्य अधिष्ठानविषये मतभेद: लक्ष्यते।

**सांख्ययोगदर्शने सुखस्य अवधारणा:**

महर्षिकपिलस्य सांख्यदर्शनं महर्षिपतञ्जले योगदर्शनं च समानतान्त्रिकदर्शनम्। योगदर्शने सांख्यदर्शनस्य पुरुषादिपञ्चविंशति: तत्त्वानि आलोचितानि। सांख्ययोगदर्शनयो: मूलं मौलिकतत्त्वद्वयं पुरुष: प्रकृतिश्च। सांख्यदर्शनानुसारं पुरुष: कैवल्यनिमित्तं, प्रकृति: सुखदु:खमोहात्मकभोग्यविषयस्य दर्शननिमित्तं पङ्गन्धन्यायेन परस्परं संयुक्ता। तस्मात् पुरुषस्य सन्निधिवशत: प्रकृतौ विक्षोभ उत्पद्यते किञ्च तस्य कार्यरूपेण महदादित्रयोविंशति: तत्त्वानि जायन्ते। महर्षिकपिलमुनि: तस्य सांख्यसूत्रग्रन्थस्य प्रथमाध्यायस्य द्वाषष्टितमसूत्रे सृष्टिप्रक्रियाया: आलोचनाप्रसङ्गे प्रकृतिलक्षणम् उक्तवान्— सत्त्वरजस्तमसां साम्यावस्था प्रकृति:। सांख्यदर्शने सत्त्वं, रज: तम: च एते त्रय: गुणा: स्वीकृता:, त्रिविधगुणानां साम्यावस्था प्रकृति:। सांख्यदर्शने पृथग्रूपेण सुखस्य लक्षणं यद्यपि न प्रतिपादितं तथापि त्रिविधगुणानाम् आलोचनायां सत्त्वगुणस्य स्वरूपप्रसङ्गे सुखविषय उपस्थापित:। आचार्य ईश्वरकृष्ण: तस्य सांख्यकारिकाग्रन्थे त्रिविधगुणस्वरूपविषये आलोचितवान् यत् सत्त्वगुण: प्रीत्यात्मक:, रजोगुण: अप्रीत्यात्मक:, तमोगुण: विषादात्मकश्च। सत्त्वगुणस्य प्रयोजनं हि प्रकाश:, रजोगुणस्य प्रयोजनं हि प्रवृत्ति:, तमोगुणस्य प्रयोजनं नियमनं, किञ्च त्रिविधगुणानां व्यापारा: भवन्ति अन्योन्याभिभव:, अन्योन्याश्रय:, अन्योन्यजनन: अन्योन्यमिथुनश्च। अर्थात् त्रिगुणस्य लक्षणविषये उक्तं सत्त्वगुण: प्रीत्यात्मक: अर्थात् सुखस्वरूप:, रजोगुण: अप्रीत्यात्मक: अर्थात् दु:खस्वरूप:, तमोगुण: विषादात्मकश्च अर्थात् मोहस्वरूप:। अत्र सुखविषये आचार्य: वाचस्पतिमिश्र: तस्य सांख्यतत्त्वकौमुदीटीकायाम् अवदत् प्रीति: सुखं, प्रीत्यात्मक: सत्त्वगुण:। अर्थात् सुखं सत्त्वगुणस्य स्वरूपम्। त्रिगुणशब्दे आत्मशब्दस्य प्रयोजनं किम्? अस्य आशङ्कायाम् उत्तरति कौमुदीकार:— परमतनिराकरणाय आत्मशब्दस्य प्रयोग: कृत:। ये चिन्तयन्ति प्रीति: दु:खाभावस्वरूपम्। प्रीति: दु:खाभावस्वरूपं चेत् प्रीतिनामकं भिन्नं वस्तु नास्ति, दु:खमपि प्रीत्याभावस्वरूपम्, प्रीत्याभावभिन्नं दु:खनामकं वस्तु नास्ति— अस्य मतस्य खण्डननिमित्तं

आत्मशब्दः प्रयुक्तः। सुखं दुःखं च परस्परं प्रति न अभावस्वरूपम्। सुखं नाम दुःखाभावः, दुःखं नाम सुखाभाव एवं न बोध्यते। सुखादेः भावपदार्थत्वं बोधयितुम् आत्मशब्दः प्रयुक्तः। एवञ्च प्रीतिशब्दस्य व्याख्यायां श्रीज्वालाप्रसादगौडः तस्य कृष्णानामकटीकायाम् अवोचत् प्रीतिः आर्जवं, श्रद्धा, अनुकम्पा, क्षमा, लज्जा, सन्तोषः, विवेकः इत्यादिविषयाणां समष्टिः। अनुरूपतया पातञ्जलयोगदर्शने अपि जडप्रकृतेः विषयत्वेन सुखं स्वीकृतम्। योगसूत्रस्य साधनपादे सुखदुःखयोः हेतुविषये उक्तं— जन्म, आयुः दुःखम् च एते पुण्यद्वारा सम्पाद्यन्ते चेत् सुखकारणम् किञ्च पापद्वारा सम्पाद्यन्ते चेत् दुःखकारणम्। विषयभोगकाले योगीनां निकटे सुखं दुःखं च कथम् अनुभूतं भवति अस्मिन् विषये आलोचनाप्रसङ्गे आचार्यव्यासदेवः तस्य योगभाष्ये सुखलक्षणविषये उक्तवान् विषयभोगद्वारा इन्द्रियाणां या तृप्तिः तृष्णायाः उपशान्तिः भवति तत् सुखम्। अत एव सुखं भवति अनुभूतिशीलद्रव्यविशेषः यत् सुखात्मकधर्मविशिष्टसत्त्वगुणस्य स्वरूपम्।

सांख्ययोगमते चेतनपुरुषः यथा नित्यः तथैव त्रिगुणात्मकप्रकृतिरपि नित्या। पार्थक्यं केवलं पुरुषः भवति अपरिणामी प्रकृतिः भवति परिणामशीला। सत्कार्यवादानुसारं प्रकृतेः परिणामसम्भूतानां समस्तवस्तूनां स्वरूपाणि सुखात्मकता, दुःखात्मकता मोहात्मकता च। अत्र जिज्ञासा उत्पद्यते यत् अस्माकं यः सुखादेः अनुभवः जायते तेषामुत्पत्तिः कथं भवति? सत्कार्यवादसांख्यमते अस्माकं अन्तःकरणेषु एव सुखादेः सत्ता वर्तते किञ्च अस्मिन् अन्तःकरणे वस्तुसंस्पर्शात् सुखादयः उत्पद्यन्ते। यदि अन्तःकरणे सुखस्य सत्ता न स्यात् तर्हि वस्तुसंस्पर्शेन अन्तःकरणे उत्पत्तेः पूर्वम् अविद्यमानं सुखं न उत्पद्यन्ते। तस्मात् वस्तुसंस्पर्शेन अन्तःकरणे सुखस्य आविर्भावः भवति। वैदान्तिकमते सुखं जागतिकवस्तोः स्वाभाविकधर्मः नास्ति, सुखं ब्रह्मस्वरूपस्य अन्तर्गतम्। किन्तु सांख्यदर्शने एवं न स्वीक्रियते, यतो हि वेदान्तदर्शने अज्ञानं त्रिगुणात्मकं स्वीकृतम्। अज्ञानस्य परिणामः अयं जागतिकविषयः त्रिगुणात्मकः नास्ति एतत् युक्तिपूर्णं नास्ति। सांख्यमते सुखं वस्तोः धर्मः। सुखं यदि वस्तोः धर्मः न स्यात् तर्हि अन्तःकरणे सुखस्य आविर्भावः अपि न स्यात्।

अत एव सांख्यदर्शनानुसारं सुखं भवति त्रिगुणात्मकप्रकृतिविषयः, यस्य वस्तुसंस्पर्शेन बुद्ध्यादयः अन्तःकरणे उत्पद्यन्ते। पुरुषप्रकृत्योः मध्ये संयोगवशात् यथा पुरुषे कर्तृत्वं, प्रकृत्यां चेतनताम् आरोप्य पुरुषः स्वं कर्ता प्रकृतिः स्वं चेतनं च मनुते। अनुरूपतया अन्तःकरणे उत्पन्नसुखादिविषयाः आरोप्यन्ते किञ्च पुरुषस्य अहं सुखी, अहं दुःखी इत्येवं ज्ञानं भवति। एवञ्च वक्तुं शक्यते यत् यतो हि सुखं दुःखं च भोग्यविषयाः तस्मात् भोग्यविषयस्य भोक्तृरूपेण सुखदुःखमोहात्मकवस्तुभिन्नः पुरुषः स्वीकृतः। यतो हि पुरुषः सुखदुःखमोहात्मकवस्तुनः भोक्ता तस्मात् भोक्तृपुरुषस्य अहं सुखी, अहं दुःखी इत्येवं ज्ञानं भवति। अत एव संयोगकाले पुरुषे सुखादिविषयाः आरोप्यन्ते चेदपि सुखादिविषयाः प्रकृतेः।

**न्यायवैशेषिकदर्शने सुखस्य अवधारणा:**

भारतीयास्तिकदर्शनेषु न्यायवैशेषिकदर्शनसम्प्रदायः सुप्रसिद्धः अन्यतमश्च।

न्यायवैशेषिकदर्शनयोः समानतान्त्रिकसत्त्वे अपि न्यायदर्शनस्य मुख्यालोच्यविषयः प्रमाणं, वैशेषिकदर्शनस्य आलोच्यविषयः प्रमेयः पदार्थो वा। न्यायवैशेषिकदर्शनयोः प्रकरणग्रन्थेषु वैशेषिकदर्शनसम्मतपृथिव्यादयः सप्त पदार्थाः न्यायदर्शनसम्मतप्रत्यक्षादीनि चत्वारि प्रमाणानि वर्णितानि। द्रव्यादिसप्तपदार्थेषु द्वितीयपदार्थरूपेण गुणः प्रसिद्धः। रूपरसादिभेदेन गुणाः चतुर्विंशतिप्रकाराः। चतुर्विंशतिगुणेषु सुखम् अन्यतमम्। आत्मनामकपदार्थानां अष्टविशेषगुणेषु सुखम् अन्यतमम्। केषाञ्चन आचार्याणां मते अहं सुखी इति अनुव्यवसायात् यस्य ज्ञानस्य प्रतीतिः भवति तत् सुखम्। पुनश्च अन्याचार्याणां मते सुखम् आत्मनः विशेषगुणः, यस्य असाधारणकारणं धर्मः। आचार्यः अन्नंभट्टः तस्य तर्कसंग्रहनामकन्यायवैशेषिकग्रन्थे सुखप्रसङ्गे उक्तवान् सकलप्राणीनां यत् स्वाभाविकाभिलाषस्य विषयरूपेण ज्ञायते तत् सुखम्। शत्रोः कृते यत् अनुकूलं मित्रस्य कृते तत् प्रतिकूलम्। तस्मात् शत्रुमित्रयोः अनुकूलं यत् तत् सुखम्। अत एव ग्रन्थकारः सुखलक्षणे सर्वेषाम् इति शब्दं प्रयुक्तवान्। सकलप्राणीनां अभिलाषविषयः सुखम् इति सुखलक्षणं नास्ति। सुखत्वजातिद्वारा सुखलक्षणं कर्तव्यम्। सुखपदशक्यतावच्छेदकरूपेण सुखत्वजातिः सिध्यति किञ्च सुखत्वजातिविशिष्टं सुखम् इति वक्तव्यम्। वेदे यानि कर्माणि विहितानि तेषाम् अनुष्ठानद्वारा यः धर्मः उत्पद्यते स धर्मः सुखस्य असाधारणकारणम्। सुखमिदं आत्मनः बुद्ध्यादिषु अष्टविशेषगुणेषु एकम्। अर्थात् सुखस्य आधार आत्मा। बुद्धिः, इच्छा प्रयत्नश्च एते त्रयः गुणाः ईश्वरे नित्याः, जीवात्मनि अनित्याः। जीवात्मनि सुखादिगुणानां सत्त्वात् ते अनित्याः। अनुरूपतया आचार्यः केशवमिश्रः तस्य दर्शनसम्मततर्कभाषाग्रन्थे सुखप्रसङ्गे उक्तवान् प्रीतिः आनन्दो वा सुखम्। सकलप्राणीनां स्वाभाविकाभिलाषस्य विषयरूपेण सुखं प्रतीयते। बुद्धेः द्वेषपर्यन्तं षट् गुणाः मानसप्रत्यक्षस्य विषयाः। अर्थात् मानसप्रत्यक्षेण सुखोपलब्धिः भवति।

वैशेषिकसूत्रस्य उपरि रचितप्रशस्तपादभाष्ये कारणभेदेन चतुर्विधानि सुखानि उल्लिखितानि— सामान्यसुखं, स्मृतिसुखं, सङ्कल्पजसुखं, विद्याशमसन्तोषादिजन्यसुखम्। अन्यरीत्या स्वकीयपरकीयभेदेन अपि सुखस्य वर्गीकरणं कर्तुं शक्यते। स्वकीयसुखं स्वानुभवद्वारा उत्पद्यते। किन्तु परकीयसुखं स्वानुमानेन उपलभ्यते। पुनश्च लौकिकसुखं वैषयिकमानसिकाभ्या-सिकाभिमानिकभेदेन विभज्यते।

**सांख्ययोगन्यायवैशेषिकदर्शनसम्मतसुखस्य तुलनात्मकं विश्लेषणम्:**

उपर्युक्तसांख्ययोगन्यायवैशेषिकदर्शनसम्मतसुखस्य आलोचनायाः गभीरतया विश्लेषणं क्रियते चेत् द्रष्टुं शक्यते यत् सुखस्य स्वरूपविषये उभयदर्शने तथा वैसादृश्यं न परिलक्ष्यते, सुखस्य आश्रयविषये सादृश्यमपि न लक्ष्यते। यद्यपि सांख्यदर्शने सत्त्वं, रजः, तमः च एते त्रयः गुणाः प्रकृत्या सह अन्तर्गतं सन्तः पृथक्तया स्वभावविशिष्टद्रव्यपदार्थाः किञ्च द्रव्यपदार्थसत्त्वे अपि वैशेषिकसम्मतगुणपदार्थाः इव न सन्ति। यतो हि सांख्यदर्शने वर्णितप्रकृत्याश्रितसुखात्मक-दुःखात्मकमोहात्मकाः त्रिविधगुणाः किञ्च न्यायवैशेषिकदर्शने प्रतिपादितपृथिव्यादिद्रव्याश्रितगुणाः समानाः अथवा एक एव नास्ति। सांख्यमते सत्त्वादिगुणाः भवन्ति द्रव्यपदार्थाः किन्तु

न्यायवैशेषिकमते रूपादिगुणाः द्रव्यात् भिन्नद्रव्याश्रितगुणपदार्थाः। यथा पशोः बन्धनं येन रज्जुना सम्पाद्यते स रज्जुः गुण उच्यते तथैव सांख्यदर्शने पुरुषबन्धनकारकत्वेन एतानि त्रिविधसत्त्वादिद्रव्याणि गुणशब्देन अभिधीयन्ते। तन्मध्ये सत्त्वगुणस्य स्वरूपं सुखात्मकम्।

सांख्ययोगदर्शनस्य न्यायवैशेषिकदर्शनस्य च सुखस्य अधिष्ठानविषये मतभेदः परिलक्ष्यते। सांख्ययोगदर्शनानुसारं सुखस्य अधिष्ठानं त्रिगुणात्मकजडप्रकृतिः प्रकृतेः सुखदुःख-मोहात्मकत्वात्। सुखादयः जडप्रकृतिविषयाः ये सृष्टेः अनन्तरं प्रकृतिपुरुषं भोगरूपेण प्रददति किञ्च पुरुषः तेषां सुखादिविषयाणां भोक्ता। प्रकृतपक्षे सुखादिविषयः पुरुषस्य नास्ति, प्रकृतेः। प्रकृतिपुरुषयोः संयोगवशात् पुरुषे आरोप्यते। यथा पुरुषप्रकृत्योः संयोगवशात् पुरुषे कर्तृत्वं प्रकृतिमध्ये चेतनतां च आरोप्य पुरुषः स्वं कर्ता प्रकृतिश्च चेतनः मनुते। सत्कार्यवादिसांख्यमते अस्माकं अन्तःकरणेषु एव सुखादिसत्ता विद्यते किञ्च अस्मिन् अन्तःकरणे वस्तुसंस्पर्शेन सुखादयः उत्पद्यन्ते। यदि अन्तःकरणे सुखस्य कापि सत्ता न विद्यते तर्हि वस्तुसंस्पर्शेन अन्तःकरणे उत्पत्तेः पूर्वम् अविद्यमानं सुखं न उत्पद्येत। तस्मात् वस्तुसंस्पर्शेन अन्तःकरणे सुखस्य आविर्भावः भवति। अन्तःकरणे उत्पन्नसुखादिविषयाः पुरुषे आरोप्यन्ते अपि च पुरुषस्य अहं सुखी, अहं दुःखी इत्येवं ज्ञानं भवति। सांख्ययोगदर्शनानुसारं सुखं त्रिगुणात्मकप्रकृतिविषयः यः वस्तुसंस्पर्शेन बुद्ध्याद्यन्तःकरणे उत्पद्यन्ते।

किन्तु अपरपार्श्वे न्यायवैशेषिकदर्शने सुखम् आत्मनः बुद्ध्याद्यष्टविशेषगुणेषु एकम्। अर्थात् सुखस्य आधारः आत्मा। बुद्धिः, इच्छा प्रयत्नश्च एते त्रयः गुणाः ईश्वरे नित्याः, जीवात्मनि अनित्याः। सुखादिगुणाः जीवात्मनि अनित्याः। जीवात्मनः विशेषगुणः सुखं यत् गुणगुणीरूपसमवायसम्बन्धेन जीवात्मनि तिष्ठति। सकलप्राणीनाम् अनुकूलतया स्वाभाविकाभिलाषस्य विषयरूपेण सुखं प्रतीयते। यदा कस्यापि जीवस्य अनुकूलविषयेण सह सम्बन्धयुक्तं भवति तदा स जीवः सुखमनुभवति। न्यायवैशेषिकदर्शनानुसारं मनसा सुखोपलब्धिः भवति। बुद्धेः द्वेषपर्यन्तं षट् गुणाः मानसप्रत्यक्षविषयाः। अर्थात् सुखस्य उपलब्धिः मानसप्रत्यक्षेण भवति। एवञ्च वेदे यानि कर्माणि विहितानि तेषाम् अनुष्ठानद्वारा यो धर्म उत्पद्यते स धर्मः सुखस्य असाधारणकारणम्।

**उपसंहारः**

उपर्युक्तालोचनातः वक्तुं शक्यते यत् सांख्ययोगदर्शनानुसारं सुखं त्रिगुणात्मकप्रकृतेः सह सम्बन्धयुक्तम्। प्रकृतपक्षे सुखादिविषयः पुरुषस्य नास्ति प्रकृतिपुरुषसंयोगवशात् पुरुषे आरोप्यते। किन्तु अपरपार्श्वे न्यायवैशेषिकदर्शने सुखं जीवात्मनः विशेषगुणः यः गुणगुणीरूपसमवायसम्बन्धेन जीवात्मनि तिष्ठति। किन्तु सांख्यदर्शने पुरुषस्य आत्मनाम्ना अभिधायकत्वे अपि सुखम् आत्मनः विषयः नास्ति, पुरुषस्य विपरीतधर्मी प्रकृतिविषयः। अत्रैव उभयदर्शनयोः द्विमतलक्षितत्वे अपि वयं द्वयोः मतयोः समन्वयं कर्तुं शक्नुमः। न्यायवैशेषिकदर्शनस्य जगतः यथार्थस्वरूपं प्रतिपादितं यत्र जागतिकपदार्थेषु आत्मा द्रव्यं किञ्च

आत्मनः विशेषगुणः सुखम्। अपरपार्श्वे सांख्ययोगमते यतो हि जगदिदं पुरुषप्रकृत्योः संयोगवशात् उत्पद्यते किञ्च बन्धनकाले पुरुषस्य सुखादिविषयाणाम् उपलब्धिः भवति तस्मात् सुखात्मकगुणः पुरुषे आरोप्यते चेदपि न्यायवैशेषिकदर्शनमिव विरोधिता न जायते। यतो हि उभयदर्शने तेषां कार्यकरणानि किञ्च सृष्टिप्रक्रियासिद्धान्तानुसारं सुखस्वरूपं यथार्थतया उपस्थापितम्।

## Bibliography


- आचार्यः, गोविन्दः, तर्कसंग्रहः; चौखम्बा-सुरभारती-प्रकाशनम्, वाराणसी; २०१५।
- उपाध्यायः, श्रीवलदेवः, संस्कृतवाङ्मयस्य बृहद् इतिहासः (नवमः खण्डः); उत्तरप्रदेशसंस्कृतसंस्थानम्, लखनौ; १९९९।
- गोस्वामी, नारायणचन्द्रः, तर्कसंग्रहः; संस्कृतपुस्तकभाण्डारः, कलकाता; २००६।
- गोस्वामी, नारायणचन्द्रः, सांख्यतत्त्वकौमुदी; संस्कृतपुस्तकभाण्डारः, कलकाता; २०१६।
- गौडः, श्रीज्वालाप्रसादः, सांख्यतत्त्वकौमुदी; चौखम्बा-सुरभारती-प्रकाशनम्, वाराणसी; २०१९।
- भट्टाचार्यः, विधुभूषणः, सांख्यदर्शनस्य विवरणम्; पश्चिमबङ्गराज्यपुस्तकपरिषत्, कलकाता; २००८।
- भट्टाचार्यः, समरेन्द्रः, भारतीयदर्शनम्; बुक्-सिण्डिकेट्-प्राईभेट्-लिमिटेड्, कलकाता; २०१५।
- मुसलगांवकरः, गजाननशास्त्री, सांख्यदर्शनम्; चौखम्बासंस्कृतसंस्थानम्, वाराणसी; २०१९।
- रायचौधुरी, अनामिका, तर्कभाषा; संस्कृतबुक्डिपो, कलकाता; २०१०।
- वागची, दीपककुमारः, भारतीयदर्शनम्; प्रगतिशीलप्रकाशकः, कलकाता; २०२०।
- शर्मा, पूर्णचन्द्रः, पातञ्जलदर्शनम्; पश्चिमबङ्गराज्यपुस्तकपरिषत्, कलकाता; २००५।
- श्रीवास्तवः, सुरेशचन्द्रः, पातञ्जलयोगदर्शनम्; चौखम्बा-सुरभारती-प्रकाशनम्, वाराणसी; २०२१।